This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

Checked 2012

कविकुलगुरु कालिदास संस्कृत विश्वविद्यालय, रामटेक
हस्तलिखित संग्रह

दाखल क्र. M771 विषय वैदिक कर्मकांड.
नाव. आग्रायण प्रयोग (mss).
लेखक/लिपीकार अंबादास जयराम वाते.
पृष्ठ 9 काळ शके 1856 पूर्ण/अपूर्ण

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥श्रीगणेशायनमः॥ अथाग्रयणप्रयोगः॥ तच्च शरद
मावास्यायां पौर्णमास्यां वा कुर्यात्॥ प्रातरग्निहोत्रं
हुत्वा दर्भेष्वासीनो दर्भान्धारयमाणः पवित्रपाणिः प
त्न्यासह प्राणानायम्य देशकालौ संकीर्त्य॥ नवान्नप्राश
नाधिकारार्थं व्रीहिश्यामाकाग्रयणाभ्यां तंत्रेण य-
क्ष्ये॥ इति संकल्प्य॥ विद्युदसि। अद्य यज्ञाय। इमा-
मूर्जं पंचदशीं॥ आग्रयणं हविरि०। अमावास्यं तंत्रं।
अन्वाधान व्रत प्रवेशः॥ सप्तदशसामिधेन्यः॥
ततस्तां त्रयोविंशति शालिधा संभरामि सुसंभृता॥
वेदं कृत्वा वेदिः॥ यस्य कस्यचित्काष्ठस्योपवेषः॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अलंकृत्य परिस्तरणं ॥ देवा देवेषु ॥ नो भावघ्नी ॥ अ
आ० प्र० ध्वं० कर्मणे वामित्यादि ॥ पात्र प्रयोग काले ॥ एकविं-
शति कपालानि । चरुस्थाल्यौ स्फ्यश्च द्वंद्वं ॥ अग्नि-
॥१॥ होत्र हवणी च शूर्प त्रयं च । पुरतः । वेदेन सह पात्र्यः
। तिस्रः । पात्र्या सह आज्य पात्रं प्रयुज्य इडापात्रं
प्रणीता सहोपसवन पात्रं । अन्वाहार्य स्थाली यजं ।
इतराणि प्रकृतिवत् । फलक त्रय युक्तामेकस्यां पा
त्र्यामसंसृष्टानि । नवानि पुराणानि च बीजानि-
स्थापयित्वा । धान्यस्य त्वा सीत्यादि । वेषाय वः । शू
र्प त्रयं । धूरसी० त्यादि । निरस्तꣳ रक्ष इति प्रत्ये ॥१॥
कं निरसनं । ऊर्जा यव इति सकृत् । निर्वापण का
ले । शूर्पे पवित्रे निधाय । यच्छंतां पंच । देवस्य त्वा०
० मग्नये जुष्टं निर्वपामि । पुराणानां व्रीहीणां निरु
प्य । अस्मिं शूर्पे पवित्रे निधाय । यच्छंतां पंच । देव
स्य त्वा० हस्ताभ्यामिंद्राग्निभ्यां जुष्टं० । इंद्राग्निभ्या
मिति नवानां । द्वितीये शूर्पे इंद्राग्निभ्यां समीपे ।
यच्छंतां पंच । देवस्य त्वा० स्वाँ भ्यां विश्वेभ्यो देवे-
भ्यो जुष्टं० । तृतीये शूर्पे पवित्रे निधाय । यच्छंतां
पंच । देवस्य त्वा० हस्ताभ्याꣳ सोमाय जुष्टं० । इ
ति चर्वर्थान् । श्यामाकान् निरुप्य । पुनर्नवानां

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

व्रीहीणां द्वितीयेश्रूर्पे पवित्रेनिधाय॥ यच्छंतां पंच।
आ०म० देवस्य त्वा० हस्ताभ्यां द्यावापृथिवीभ्यां जुष्टं०॥ इति
॥२॥ न्येवानां व्रीहीणां निर्वापः॥ निरुप्तेष्व भ्योप्य॥ इदं
देवानामिति तंत्रेण॥ इद मु नः सहेति मंत्रेण॥
स्फात्यै त्वा॥ इदमहं निष्ट्यादि॥ अदित्यास्त्वोपस्थे सा
दयाम्यग्ने हव्यं रक्षस्वेंद्राग्नी हव्यं रक्षेथां वि-
श्वेदेवा हव्यं रक्षध्वं सोम हव्यं रक्षस्व द्यावा
पृथिवी हव्यं रक्षेथां॥ रक्षपसादनं। सभूकाया
मित्यादि। प्रोक्षितास्थित्यं ते कृते॥ अथाज्यस्था ॥२॥
लीं गतेनास्रं स्कृते लौकिकाज्येन जुह्वां पंच.

गृहीते पंचाज्याहुतीर्जुहोति॥ शतायुधाय शत
वीर्याय शतोतयेभिमातिषाहे॥ शतं यो नः शर
दो अजीतानिंद्रो नेषदति दुरितानि विश्वा स्वाहा
॥ यज०॥ इंद्रायेदं०॥ ये चत्वारः पथयो देवयाना
अंतरा द्यावापृथिवी वियंति॥ तेषां यो अज्यानिम
जितिमावहात्तस्मै नो देवाः परिदत्तेह सर्वे स्वाहा
॥ देवेभ्य इदं०॥ ग्रीष्मो हेमंत उत नो वसंतः शरद्व
र्षाः स्वित नो अस्तु॥ तेषामृतूनां शत शार-
दानां निवात येषामभये स्याम स्वाहा॥ ग्रीष्महेमं
त वसंत शरद्वर्षाभ्य इदं०॥ इदु वत्सराय परि

वत्सराय संवत्सराय कृणुता बृहं नमः॥ तेषां वयꣳ
आ० प्र० स्मुमतौ यज्ञियानां ज्योग्जीता अहता स्याम स्वाहा
॥ इदु वत्सर परिवत्सर संवत्सरेभ्य इदं०॥ भद्रां
॥३॥ नः श्रेयः समनैष्ट देवा स्त्वया वसेन समशीम-
हि ला॥ सनो मयोभूः पितो आविशास्व शं तोका
य तनुवे स्योन स्वाहा॥ देवेभ्य इदं०॥ इति पंचा-
ज्याहुतीर्जुहोति॥ अथ ब्रम्हाणमामंत्र्य॥ देवस्य०
हस्ताभ्यामग्नये वो जुष्टं प्रोक्षामी अग्नि भ्यां वो जु
ष्टं प्रोक्षामि विश्वेभ्यो देवेभ्यो वो जुष्टं प्रोक्षामि सो ॥३॥
माय वो जुष्टं प्रोक्षामि द्यावापृथिवीभ्यां वो जुष्टं प्रो

-क्षामि॥ कृष्णाजिनादानादि॥ तंदुलप्रस्कंदनांतं
पुराणानां कृत्वा। अग्ने स्तनूर सीत्यादि। सर्वेषाꣳ हवि
ष्कृदेहीति सकृत्। उच्चैः समाहंतवै इत्यादि। नवा
मप्याग्नौ प्रप्रेषवर्जं तथैव करोति। न हविष्कृदेहि
। नोच्चैः समाहंतवै। त्रिष्फलै कर्त्तवा इति सकृत्।
पुनरग्ने स्तनूर सीत्यादि श्यामाकानाँ मपि प्रविद्धꣳ
रक्ष इत्यंतं कृत्वा। मध्यमे पुरोडाश कपाले तुषानो-
प्य। अद्भिः कपालमित्यादि। श्यामाकानामपि तंदु
लप्रस्कंदनां तं कृत्वा। अरश्मेनवरति तंत्रेण।
एवं त्रिष्फलीकर्त्तवा इत्यादि। देवेभ्यः शुंधध्वमि-

आ० प्र० त्यादि । प्रक्षाल्य पुराणानां संकृत्वा । नवानां तथैव । श्या
माकानामपि तथैव कृत्वा । निष्फलीक्रियमाणानामपि
॥४॥ तन्त्रेण । नवांस्तंडुलांस्त्रेधा कृत्वा । भागद्वयस्यामिव
कृत्वा । यथा भागं व्यावर्त्तध्वं इति विभज्य । इदमिंद्रा
ग्न्योः । इदं द्यावापृथिव्योः । पुरोडाशार्थान् । इदं वि
श्वेषां देवानामिति चरुर्थान् । कृष्णाजिनादाना
दि । क्रमेण अधिवपनं । अणूनि कुरुतादिसंतं आ
ग्नेयस्य कृत्वा । पुनः कृष्णाजिनादानादि । इंद्राग्नि
भ्यां जुष्टमधिवपामि द्यावापृथिवीभ्यां जुष्टमधि ॥४॥
वपामि । इति नवानामपि करोति । धृष्टिरसी

त्यादि । कपालानामुपधानकाले । आग्नेयस्याष्टा
उपधाय । ऐंद्राग्नस्य मंत्रतो ष्टा उपधाय । तूष्णीं
चत्वार्युपदधाति । ध्रुवोसीति वैश्वदेवच-
रून् । ध्रुवोसीति सौम्यस्थालीं । ध्रुवमसि पृ
थिवीं दृं० पर्यूह । प्रथमेन कपालमंत्रेण द्यावापृ-
थिव्यस्यैकमुपधाय । भृगूणामित्यादि । ध्वमि-
तिद्भिः । तपसा तप्यस्वेत्येककपाले । अग्नये जुष्ट ले
ं संवपामि । इत्येकस्मिन् फलके । इंद्राग्निभ्यां
जुष्टं संवपामि । द्यावापृथिवीभ्यां जुष्टं सं
वपामि । इत्यपरस्मिन् । पिष्टान्युत्सूय तंडुला

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नुसुनाति। देवस्त्वा सवितेति पयउत्सूय वैश्व
आ०ऋ० देवस्थाल्यामानयति। अपउत्सूय सौम्यस्था-
।।५।। ल्यामानयति। मखस्य शिरोसीति आग्नेयं
कृत्वा। नवानांपिंडं कृत्वा यथाभागं व्यावर्त्तध्व
मितिविभज्य इदमिंद्राग्न्योः। इदं द्यावापृथि
व्योः। इत्यभिमृश्य। आग्नेयमैंद्राग्नंचाधिश्रि
त्य। घर्मोसीति वैश्वदेवस्थाल्यां पयसि तंडुला
नोप्य घर्मोसीति द्वितीयस्थाल्यांश्यामाकतंडु ।।५।।
लानोप्य एककपालमभिश्रयति। मथनादिपु
रोडाशानामंतरितं सर्वेषां। अप्यलेपंनि

नीय। अग्नेनुस्तरमित्यादि। उद्वासनकाले।
आप्यायतां घृतयोनिरित्याग्नेयमभिघार्येतू
ष्णीमितराण्यभिघार्य। क्रमेणोद्वासयति। आ
र्द्रोभुवनस्येति चरोरुद्वासनं। अथान्यस्मिं-
पात्रे स्योनंतइत्यादि। एककपालमुद्वास्य। देव
स्त्वा सवितेति अलंकरणं। अनेनैककपालम-
भिपूरयित्वा विप्रष्टंवा कृत्वा ध्रियेणेति सर्वा-
ण्यासादयति। यज्ञोसि०। अयंयज्ञ इति सर्वा
णि हवींषि। योनः कनीय०। अपतामिंद्राग्नी
भुवनान्नुदेतां० योनः कनीय०। अपतं विश्वेदेवा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

आ॰ प्र॰ भुवनान्नुदंता॰। ममाग्ने पंच। आग्नेयेन प्रच
यै। तेंद्राग्न्यं तं प्रकृतिवत्। विश्वेभ्यो देवे-
॥६॥ भ्यो नु ब्रूहि। विश्वांदेवान्यज। विश्वेभ्योदे
वेभ्यइदं॰॥ विश्वेषां देवाना महंदेव यज्य-
या प्राणैः सायुज्यं गमेयं॥ सोमा यानु ब्रूहि।
सोमं यज। सोमायेदं॰। सोमस्याहं देवयज्य
या त्वश्वरहा भूयासं॥ अथैककपाल घृ ला दुध
स बर्हि षदं कृत्वा स्रुवाभुपस्तीर्य कृत्स्नमव ॥६॥
दाय प्राति छाप्याश्नय मन्वानीयाभिघार्य द्या
वा पृथिवीभ्यामि त्यु पांशु त्वा अनु ब्रूही युच्चैः।

आश्राव्य प्रत्याश्रावयति। द्यावापृथिवी यज। अपर्यावर्तय
जुहोति। अत्रपुरोडाशा पर्यावर्तन भयेन केचित्लोक-
यीर्थं दर्भमयं सिक्यं कृत्वा तत्र संस्थाप्य वामहस्तेन सि
क्यमूर्ध्वं धृत्वा ससिक्यमेव स्रुवा जुहोति। द्यावापृ-
थिवीभ्यामिदं॰। द्यावापृथिव्योरहंदेव यज्ययो भयो-
र्लोकयो र्ऋ ध्यासं। यदि हु तः पर्यावर्त्तेत तर्हि स्रुचोग्रे
ण कल्पयितव्यः। अथवा आज्येन द्यावापृथिवीयजे
तत दाध्रुवात एव चतुर्गृहीतं गृहीत्वो पांशु प्रत्यर्यि
पूर्ववज्जुतानु मंत्रणं कुर्यात्। नदक्षिः। अत्रवापं
चाज्याहुतीर्जुहोति। नपार्वण होमः। नारिष्टान्हुत्वा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

आ० प्र०
॥ ६॥

स्विष्टकृतादि। आग्नेयं वितराप्य विरुज्य प्राशित्रं।
इडावदान काले। श्यामाकं यजमान भागं प्रथमं। ध्रुवा
या उपोहति। पश्चादितरं। इडा भक्षणे प्रकृतमंत्रं जपि
त्वा। आग्नेयस्य चतुर्धाकरणं। दाक्षिणाकाले। व-
स्त्र वाससी अग्रं तर्वेदि स्थापयित्वा। अमूणी अमूणी स्थो
हुताद्य मा मा हिꣳसीमहुतो मह्यꣳ शिवे भवतं। इति-
अभ्याभिमन्त्र्याति। अधापिन्वस्व स्फ ह्युका॥ सहस्रधा
रे उत्से अक्षीयमाणे तेद धुक्षतुः॥ दिवं चि ताभ्यां व-
स्त्र वासोभ्यामभि तराणि मृत्युं॥ २ इति यजमानः। ॥ ६॥
अमूणा इमे वो वस्त्र वाससी वस्त्रमहिꣳसं तो यथा

भागं प्रतिगृह्णीध्वं॥ समुद्रः कृत्तो पान्या॥ देवस्य
त्वा सवितुः० ॥ रुद्राय गां। इति वस्त्रं प्रतिगृह्य।
देवस्यत्वा० ॥ देवि दक्षिणे ग्नास्त्वा कृतं नप सस्त्वा-
तन्वल बरूभय स्त्वा वय ꣳ सोमाय वासः॥ तेना-
मृतत्वमश्यामि त्वादि प्रतिग्रहः। उत्तरतः परीतेत्वा
दि। भद्रान्नः श्रेयः समनैष्ट देवास्त्व० महित्वा॥ सनो मयो
भूः० स्योनः॥ इति यजमानभागं प्राश्नाति॥ अग्निः प्रथ
मः प्राश्नातु सहि वेद यथाहविः॥ शिवा अस्मभ्य मो
षधीः कृणोतु विश्वचर्षणिः॥ इति श्यामाक भागं।
शेषं प्रकृतिवत्॥ कपालो द्वासने॥ यत्र घर्मे कपा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ऽमुपचिनोति वेध्यसः ॥ पूष्णस्तदपि व्रतइंद्रवा
आ० प्र० यूविमुंचतां ॥ ऐंद्रैक कपाले विशेषः ॥ यज्ञशं चमवर्जं।
ब्राम्हण तर्पणं ॥ छ ॥ छ ॥ इति श्यामाक श्री ह्याग्रयण-
॥९॥ प्रयोगः समाप्तः ॥ ॥ यवाग्रयणे तु ॥ इंद्राग्नी विश्वेदे
वाः द्यावापृथिवी० इति तिस्त्रभ्यो नवीन यवानामिव
निर्वापः ॥ वत्सोदक्षिणा ॥ अन्य त्सर्वं श्री ह्याग्रयणवत्
॥ यजमान भाग प्राशनकाले ॥ एतेमुत्यं मधुना संयु-
तंवयं सरस्वत्या अधिमनावचर्कृषुः ॥ इंद्र आसी-
त्सीरपतिः शतक्रतुः कीनाशा आसन्मरुतः सुदा ॥९॥
नवः ॥ छ ॥ इति यवाग्रयणं समाप्तं ॥ शके १८५६ ॥
भावनाम संवत्सरे उत्तरायणे श्री माघमासे कृष्ण

पक्षे ७ म्यां तिथौ भौमवासरे तद्दिने ४ प्रहरे इदंपु-
॥१॥ स्तकं समाप्तं ॥ इदंपुस्तकं वातेरत्सुपनामकेन जय-
राम सूनुना अंबादासेन लिखितं हेडगेइत्युपनामका
यबालिरामस्य पुत्राय सखीतारामशर्मणे ब्राम्हणाय द
त्तमस्तीति स्वहस्तु ॥ ॥
॥१॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ इति आग्रायणप्रयोगः ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[OrderDescription]
,CREATED=27.08.19 15:43
,TRANSFERRED=2019/08/27 at 15:46:28
,PAGES=11
,TYPE=STD
,NAME=S0001557
,Book Name=M-771-AAGRAYAN PRAYOG
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection